# लघुशब्देन्दुशेखरः

## श्रीपराम्बाव्याख्यासहितः

(कारकप्रकरणम्)

व्याख्याकारः

**डॉ० रामसलाहीद्विवेदी**

सम्पादकौ

**बद्रीनारायणगौतमः**

चक्रपाणिपोखे्रलः

# लघुशब्देन्दुशेखरः
## श्रीपराम्बाव्याख्यासहितः
## ( कारकप्रकरणम् )


व्याख्याकारः

**डॉ० रामसलाहीद्विवेदी**

सहाचार्यो व्याकरणविभागः

श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्

कुतुबसांस्थानिकक्षेत्रम्

कटवारियासरायः, नवदेहली-16

सम्पादकौ

**बद्रीनारायणगौतमः**

चक्रपाणिपोखेलः



BOOK EASTERN EBL LINKERS

**ईस्टर्न बुक लिंकर्स**

दिल्ली : : (भारत)

प्रकाशक :

**ईस्टर्न बुक लिंकर्स**

हैड ऑफिस: 5825, न्यू चन्द्रावल,
जवाहरनगर, दिल्ली-110007
फोन : 23850287, 9811232913

शोरूम: 4806/24, भरत राम रोड,
दरिया गंज, नई दिल्ली-110002
फोन : 23285413

e-mail : eblindology@gmail.com
ebl.info76@gmail.com
Website : www.eblindology.com

© लेखक

प्रथम संस्करण : 2020

मूल्य : ₹ 950

ISBN : 978-81-7854-373-4

---

**Laghuśabdenduśekharaḥ Parāmbāvyākhyāsahitaḥ**

*Dr. Ramslahidvivedi*

---

टाईप सैटिंग : **क्रियेटिव ग्राफिक्स**
मुद्रक : **आर. के. प्रिंट सर्विस**, दिल्ली

।।श्री सरस्वत्यै नमः।।

# अथ कारकप्रकरणम्

## ।।अथ प्रथमा।।

### प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा ( 2.3.46 )

कौमुदी - नियतोपस्थितिकः प्रातिपदिकार्थः। मात्रशब्दस्य प्रत्येकं योगः। प्रातिपदिकार्थमात्रे लिङ्गमात्राद्याधिक्ये संख्यामात्रे च प्रथमा स्यात्। उच्चैः। नीच्चैः। कृष्णः। श्रीः। ज्ञानम्। अलिङ्गा नियतलिङ्गाश्च प्रातिपदिकार्थमात्र इत्यस्योदाहरणम्। अनियतलिङ्गास्तु लिङ्गमात्राधिक्यस्य। तटः, तटी, तटम्। परिमाणमात्रे द्रोणो व्रीहिः। द्रोणरूपं यत्परिमाणं तत्परिच्छिन्नो व्रीहिरित्यर्थः। प्रत्ययार्थे परिमाणे प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणम्, प्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन व्रीहौ विशेषणमिति विवेकः। वचनं संख्या। एकः। द्वौ। बहवः। इहोक्तार्थत्वाद्विभक्तेरप्राप्तौ वचनम्।

शेखरः - "स्वौजसमौड्" ( 4.1.2 ) इति विहितस्वादीनामर्थविशेषव्यवस्थां दर्शयितुमाह - प्रातिपदिकार्थेति। इदमपि सूत्रं क्रियायोग एव प्रवर्त्तते, अन्ततोऽस्तिक्रियायाः सर्वत्र सत्त्वात्। आख्यातार्थकर्त्रादिनाऽभेदान्वयेन तदद्वारकः क्रियायोगो बोद्धयः। प्रथमान्तार्थस्यापि क्रियाजनकत्वादस्याः कारकविभक्तित्वेन भाष्ये व्यवहारः। ननु कृष्णादिशब्देषु लिङ्गस्यापि प्रातिपदिकार्थत्वाल्लिङ्गग्रहणमनर्थकमत आह - नियतेति। यस्मिन्प्रातिपदिके उच्चारिते यस्यार्थस्य नियमेनोपस्थितिः स इति तदर्थः। अन्वयानुपपत्तिपूर्विका लक्षणा पद एव। प्रत्ययोत्पत्तिः सर्वत्र शक्यार्थ एव। शक्यतावच्छेदकारोप एव च लक्षणेति न लक्ष्यासङ्ग्रहो दोषः। तटादिशब्दानां तत्तत्प्रत्ययसमभिव्याहारे सकललिङ्गबोधकतया न किमपि लिङ्गं ततो नियतोपस्थितिकमिति न तद्बोद्धयलिङ्गस्यात्र प्रातिपदिकार्थशब्देन ग्रहणमिति लिङ्गग्रहणमिति भावः। लिङ्गमात्रेति। लिङ्गस्यैवाधिक्ये इति क्रमेणार्थः। यद्यपि विशेष्य-विशेषणभावोऽप्यधिको भासते तथापि तस्य वाक्यार्थत्वेन बहिरङ्गतया न स्वार्थमात्रनिमित्तकप्रथमप्रवृत्तसंस्कारबाधकत्वमिति बोद्धयम्। अभेदेन

।। श्रीः ।।

चौखम्बा सुरभारती ग्रन्थमाला
700

# शाश्वती

## डॉ. सन्तोष कुमार पाण्डेय स्मृतिग्रन्थ

# Śāśvatī

## Dr. Santosh Kumar Pandey Commemoration Volume

वेद-पुराण-साहित्य-साहित्यशास्त्र-व्याकरण-दर्शन-ज्योतिष-भारतीय संस्कृति आदि विविध विषयों पर विषय-विशेषज्ञ मूर्धन्य विद्वानों के शोध-आलेखों का उत्कृष्ट संग्रह

**सम्पादक मंडल**

**शैलेश कुमार मिश्र • कंजीव लोचन**

**धनञ्जय वासुदेव द्विवेदी • अवधेश कुमार पाण्डेय**

**चौखम्बा सुरभारती प्रकाशन**

वाराणसी

© **सर्वाधिकार सुरक्षित ।** इस प्रकाशन के किसी भी अंश का किसी भी रूप में पुनर्मुद्रण या किसी भी विधि (जैसे-इलेक्ट्रोनिक, यांत्रिक, फोटो-प्रतिलिपि, रिकॉर्डिंग या कोई अन्य विधि) से प्रयोग या किसी ऐसे यंत्र में भंडारण, जिससे इसे पुनः प्राप्त किया जा सकता हो, सम्पादक मंडल की पूर्वलिखित अनुमति के बिना नहीं किया जा सकता है।

इस स्मृतिग्रन्थ में प्रकाशित आलेख सम्बद्ध लेखकों के निजी विचार हैं। किसी विवाद की स्थिति में उसका समस्त दायित्व सम्बद्ध लेखक का होगा। सम्पादकगण एवं प्रकाशक इसके लिए जिम्मेदार नहीं होंगे।

**शाश्वती–डॉ. सन्तोष कुमार पाण्डेय स्मृतिग्रन्थ**

**ISBN : 978-93-94829-29-9**

प्रकाशक :

**चौखम्बा सुरभारती प्रकाशन**

(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)
के 37/117 गोपाल मन्दिर लेन, पोस्ट बॉक्स न. 1129
वाराणसी 221001
दूरभाष : +91 542 2335263, 2335264
e-mail : chaukhambasurbharatiprakashan@gmail.com
website : www.chaukhamba.co.in
@chaukhambabooks
@chaukhambabooks

© **सर्वाधिकार सुरक्षित**

प्रथम संस्करण : 2022
₹ 4995.00

वितरक :

**चौखम्बा पब्लिशिंग हाउस**

4697/2 ग्राउण्ड फ्लोर, गली न. 21-ए
अंसारी रोड, दरियागंज
नई दिल्ली 110002
दूरभाष : +91 11 23286537, 41530947 (मो.) +91 9811104365
e-mail : chaukhambapublishinghouse@gmail.com

*

अन्य प्राप्तिस्थान :

**चौखम्बा संस्कृत प्रतिष्ठान**

4360/4, अंसारी रोड, दरियागंज
नई दिल्ली 110002

*

**चौखम्बा विद्याभवन**

चौक (बैंक ऑफ बड़ौदा भवन के पीछे)
पोस्ट बॉक्स न. 1069
वाराणसी 221001

**मुद्रक :** ए.के. लिथोग्राफर, दिल्ली

138. सृष्ट्युत्पत्तिविमर्श- डॉ. मधुबाला शर्मा 972
139. विवेकानन्द की अमूल्य बातें- डॉ. रामनारायण पण्डित 978
140. What is Vedanta!- Dr. Abhay Krishna Singh 983
141. Ahimsa in Gandhian Philosophy- Dr. Abha Jha 990
142. वेदान्तदर्शने विभागसमीक्षा- सत्यजितः मण्डलः 997
143. विवेकानन्द का व्यावहारिक वेदान्त और आत्मतत्त्व विवेचन- महेश्वरी कुमारी 1001
144. न्याय-वैशेषिक दर्शन में उपाधि विमर्श- रजनीश कुमार 1005
145. भगवच्छाङ्कराद्वैतभाष्ये ब्रह्मैकत्वविद्याप्रतिपत्तये
समाधेर्प्रयोजनं विश्लेषणात्मकमध्ङ्ननम्-सन्दीप चटर्जी 1013
146. योगाभ्यासस्य शारीरिकमानसिकसामाजिकसांस्कृतिकाश्च परिणामाः (Physical
psychologicalsocial and cultural benefits of yogic practice)- जनार्दन भोइ 1023
147. भारतीय दर्शन की विशिष्ट दृष्टि- डॉ.आभा झा 1029


## संस्कृतिविमर्श


148. राष्ट्रचेतनायै साम्प्रतं संस्कृतशिक्षणम्-प्रो. रहसविहारीद्विवेदी 1040
149. श्रीकृष्णं वन्दे- प्रो. राम सलाही द्विवेदी 1051
150. संस्कृतवाङ्मये विश्वकल्याणस्य अवधारणा- प्रो. (डॉ.) नन्हकू राम दूबे 1054
151. पुनर्जन्म की अवधारणा : वैदिक चिन्तन- प्रो. उपेन्द्र कुमार त्रिपाठी 1061
152. सोमयाग - एक संक्षिप्त परिचय- अनुष्टुप चट्टोपाध्याय 1066
153. सांस्कृतिक एकता में धर्मसमन्वयक साहित्य का योगदान:
समुद्रसंगम अथवा मज्म-उल-बहरैन के परिप्रेक्ष्य में-डॉ. नारायणदत्त मिश्र 1071
154. Hinduism: Way of Living and Practices- Dr. Piyushbala 1080
155. गुरुकुलीन शिक्षा-पद्धति- डॉ. प्रवीण कुमार द्विवेदी 1085
156. अमर भाषा संस्कृत- पूनम तिवारी हिंदुस्तानी 1088
157. संस्कार : जीवन के सूत्र- संजू कुमारी 1102
158. श्रीकृष्णजन्माष्टमी-भगवान् के अवतार का मुख्य प्रयोजन - सीतेश कुमार पाण्डेय 1118
159. भारत की संस्कृति- प्रज्ञा दूबे 1124
160. भारतीय संस्कृति : अनेकता में एकता- गौरीनन्दन द्विवेदी 1127


## विज्ञानविमर्श


161. संस्कृत में आधुनिक विज्ञान- प्रो. बनमाली बिश्वाल 1131
162. Nanotechnology and Nanoscience in Ancient India- Rutam Biswal 1159
163. Complementary and Alternative Medicine for Bone Health- Shalini Lal 1176


## पुस्तकविमर्श


164. जीवन की स्मृतियाँ : एक अंतर्यात्रा- डॉ. शैलेश कुमार मिश्र 1181
165. सारस्वतीसुषमायाः स्वर्णजयन्तीविशेषाङ्कस्य समीक्षणम्-डॉ. धनञ्जयवासुदेवोद्विवेदी 1189

# श्रीकृष्णं वन्दे

प्रो. राम सलाही द्विवेदी

भगवान् वेदः स्वमहिम्ना समस्तमपि लोकव्यवहारं करुणया जनहिताय प्रयोजयति, तत एव विपश्चितामपि पाथेयं समुपलभ्यते, तेनैव धर्माधर्मव्यवस्थायाः संस्थापनात्। धर्मश्चायं लोकाऽभ्युदयाय परिगीत ऋषिभिः। तदा लोके हि प्रवर्तमानाः जनाः लोककर्मस्वप्यानुगुण्यं लभन्ते। तदेव वेदेषु सिद्ध्यर्थं सर्वैरपि स्वीयं कर्तव्यमिति मत्वाऽभ्यसनीयमेव। अयञ्चाभ्यासो यथापात्रमेव स्यादित्यनुधेयमेव। तदेव स्वयमुपनिषत् परामृशति- वेदाऽभ्यासात्परमान्तरं शुक्लमजरं ज्योतिरस्मिन्नेवापारे तमसि वीते निवर्तते।

अयञ्च वेदः कर्माकर्मविकर्मवादेषु व्याख्यातृवैगुण्यात् प्रतिपादितस्तदेव ज्ञानमस्य दुष्करमिव प्रतिभाति। तस्मादीश्वरगुरुविप्रादिकरुणैकधनानां विपश्चितां लोकोत्तरप्रतिभावतामेव सहृदयत्वमासाद्य सुहृद्भावेन प्रवर्तना विधेया। नहि दर्शनान्तरेषु वैगुण्यबुद्धिः कदाचिदप्युत्पादयेत्। तदेव आगमप्रमाणं दर्शनान्तरन्न निन्द्यादिति। तदेव वेदाध्ययनपरम्परासु तदुपजीव्यसाधनासु च गुरुरेव परमात्मभावेन समादृतः। सकलस्यापि साद्गुण्यस्य परमं प्रयोजनं गुरोर्हार्दं विज्ञायैव प्रवृत्तिविज्ञानमाचरेदिति। गुरोः कारुण्यहेतुः तत्सुहृदत्वमेव तदेवोक्तं महाभाष्ये सुहृद्भूत्वा आचार्य इदं शास्त्रमन्वाचष्टे इत्यादि।

एतत्कारुण्यमेव वाङ्मयरूपेण साम्प्रतमुपलब्धम्। तदेवाऽह श्रुतिरपि साक्षात्कृतधर्माण ऋषयो बभूवुस्तेऽपरेभ्योऽसाक्षात्कृतधर्मेभ्य उपदेशेन मन्त्रान् सम्प्रादुः, उपदेशाय ग्लायन्तोऽपरे बिल्मग्रहणायेमं ग्रन्थं साम्नासिषुर्वेदं च वेदाङ्गानि च।

अत्र बिल्मपदस्य विवरणं भासनम् इति रूपेण करणीयम्। तदेवाप्तं व्याख्यानं स्याद्यत्र वेदानुकूलत्वमनुपदमनुस्यूतं भवति। उक्तं हि-

आविर्भूतप्रकाशानामनुपप्लुतचेतसाम् ।
अतीतमनागतज्ञानं प्रत्यक्षान्नावशिष्यते ।। इत्यादि।

मन्येऽहमित एव भाष्यपरम्पराऽन्वारब्धा। तत्र हेतुः यथार्थबोधायानुकूलत्वमेव। कदाचिदपि सूत्रकृन्मतन्नोपेक्षते विवरणम्। पतञ्जलिरपि समर्थयति सिद्धान्तमेनम्- तदेव विगृहीतं व्याख्यानं भवति इति। किञ्च व्याख्यानतो विशेषप्रतिपत्तिर्निहि सन्देहादलक्षणम् इत्यादि न्यायोऽप्यानुकूल्यमुपैति। अत्र

विषय एवमपि ध्येयं भवति यच्छास्त्राण्यभ्युदयपराणि भवन्ति। अभ्युदयश्च वेदविहितकर्मद्वारैव। तेनापि यथावेदं शास्त्राणां विवरणमनुष्ठेयम्। इदमेव बुद्धेश्चातुर्य प्रतिभायाश्च प्रकर्षस्थानमिति।

तस्यैव वेदस्याञ्जसा ज्ञानाय षडङ्गानि कल्पितानि एकैकमङ्गमादाय विविधानि शास्त्राण्यृषिभिरुपज्ञातानि। तानेव वेदानासाद्य सर्वमपि दर्शनशास्त्र प्रादर्भूतं सद्विलसति। तदेव भर्तृहरिराह-

तस्यार्थवादरूपाणि निश्रिताः स्वविकल्पजाः।

एकत्विनां द्वैतिनां च प्रवादाः बहुधा मताः।। इत्यादि।

एतेन स्पष्टं भवति यत् सर्वेऽपि प्रवादाः स्वस्वविकल्पसमुत्थाः। विकल्पानां तु वेदवाक्यानि मूलानि, ते तु प्रवक्तारः स्वस्वविकल्पानुसारेण तेषां वाक्यानां तदर्थान् परिकल्प्य दर्शनभेदान् परिकल्पितवन्तः। अत्रापि विभिन्नेषु मतेषु परिलक्षितेष्वपि परमार्थत एकत्रैवाऽर्थे स्वकीयं प्रतिपाद्यमवधारयन्ति। यथाऽनादियोग्यतावशात् श्रोत्रत्वङ्नेत्रादीनि स्वीयं स्वीयं विषयं प्रमाणयन्ति, तथैव सर्वाण्यपि शास्त्राण्यवान्तरविषयान् प्रतिपाद्य सिद्धान्तवत्तत्रैव प्रतिपद्यन्ते। परन्तु परमार्थतः परमाद्वयतत्त्वसाधन एवं सहायकानि भवन्ति। यथा वैशेषिक दर्शनं भिन्नभिन्नपदार्थेषु विशेषतत्त्वस्य निरूपणं विधाय भेदस्य निरूपणं करोति। तस्याऽयमस्त्यभिप्रायः कश्चिदपि पदार्थो विज्ञानमात्रन्नास्ति। यदि विषयो भिन्नो नास्ति तथा विज्ञानेऽपि कथम्भेद उत्पद्यते? अतः प्रत्येकस्मिन् पदार्थ एको विशेष्यो भवति, तस्यैव प्रत्यक्षादिप्रमाणैः प्रमात्वं साध्यते। एतेनेदमवगतं भवति यद्विज्ञानवादस्य निराश एवाऽस्य दर्शनस्य तात्पर्यम्। न्यायदर्शनमपि आत्मनोऽन्तर्भावं द्रव्येषु करोति। द्रव्यञ्च गुणानामाश्रयो भवति। तस्य भेदद्वयमपि प्रसाधितमत्र दर्शने। अयञ्च परमात्मा जगतो निमित्तकारणत्वेनाऽवतिष्ठते। तेन स्पष्टं जातं यदस्यापि दर्शनस्य तात्पर्य शून्यतावादस्य, विज्ञानरूपतावादस्य, निरीश्वरतावादस्य च खण्डन एव। किञ्च परमं तात्पर्यमस्य दर्शनस्य भावपदार्थस्य सिद्धिद्वारा एक सत् इत्यस्य स्थापनमेव। अत एवेश्वरवादिन एते भवन्ति। सांख्यदर्शनन्तु आत्माऽनात्ममध्ये विवेकमासाद्य तत्त्वानां बहुलीकरणञ्च विधायैकैक प्रकृतिबुद्ध्या प्रतिष्ठापयति। परन्तु सर्वेषामपि भावानामेकस्यामेव प्रकृतौ समावेशं कृत्वा भावबाहुल्यं निरस्तं कृतं तेन। इदमेव दर्शनस्याऽस्य प्रतिपाद्यम् अत एवम्प्रकारेण सर्वेषां शास्त्राणां परस्परमुपकारकत्वेनाऽभिमतम्। तेषां शास्त्राणां टीकाग्रन्था अपि शास्त्रविदो यथावसरं महता परिश्रमेण च विदधुः। तदेव भागवतमपि पुष्णात्यमुं सिद्धान्तम्-

मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते त्वहम्।
एतावान् सर्ववेदार्थः शब्द आस्थाय मां भिदाम्।।
मायामात्रमनूद्याऽन्ते प्रतिषिद्य प्रसीदति। इत्यादि।

अस्मिन्नेव क्रमे आचार्याः परमार्थतत्त्वस्य प्रतिपादने सततं प्रक्रमन्ते। विकल्पस्य गुणाधीनत्वात् कदापि विश्रान्तिकल्पना कर्तुं न शक्यते। अत्र विषय एवमप्यहमवधारयामि यदाचार्याणां महत्त्वं किमपि विलक्षणमेव भवति। तेषां ज्ञानमबाधितं सत्तिष्ठति, अत एव नामग्रहणमात्रेण तत्र विकल्पविधिः दृष्टः। तस्य च पालनमपि धर्मोत्पत्त्यै क्रियत एव। तदेव उदिते जुहोति, अनुदिते जुहोति इत्यादिवाक्यानां परम्परा प्रसिद्धा। व्याकरणशास्त्रेऽपि विकल्पविधायकानि शास्त्राणि प्रथितान्येव। यथा- लोपः शाकल्यस्य, ओतो गार्ग्यस्य, लङः शाकटायनस्य। परन्तु भाष्यकृन्मतं यथासम्प्रदायं प्रतिष्ठितं भवति।

तत्र विकल्पस्यावसरो न जायते। अत एव आचार्याणां सम्मानः कदापि केनापि न निषिद्धः। भाष्यकृन्मतन्त्वालोडनीयमेव। दर्शनान्तरविज्ञानस्याऽवान्तरमपि फलं प्राप्यते। उक्तवाँश्च भर्तृहरिः–

प्रज्ञा विवेकं लभते भिन्नैरागमदर्शनैः।
कियद्वा शक्यमुन्नेतुं स्वतर्कमनुधावता।।

पुनश्च सर्वत्रापि सिद्धान्तेष्ववस्थितस्य प्रपञ्चस्य मुख्यं तत्त्वं किमित्यस्य ज्ञानमीश्वरानुकूल्यमन्तरेण कदापि न सम्भवति। तदेवोक्तम्–

किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत्।
इत्यस्य हृदयं लोके नान्यो यद्वेद कश्चन।। इत्यादि।

न न कर्तव्येत्यादितात्पर्यमवधार्यम्। यथा अहमन्नमहमन्नहमन्नादमेव च' इत्यादिश्रुतिष्वेकस्यैव भोग्यभोक्तृत्वरूपता निर्दिष्टा तथैव सर्वस्यापि वाङ्मयस्य नारायणरूपतैवाऽभिमता। उक्तञ्च महाभारते–

पदाङ्गसन्धिपर्वाणं स्वरव्यञ्जनमण्डितम्।
यमाहुरक्षरं दिव्यं तस्मै वागात्मने नमः।। इत्यादि।

अतः प्रातिभासिकस्यापि ज्ञानस्य प्रवाहश्चेतनप्रवाहवदक्षुण्ण एव, सर्वत्रापि शब्दद्वारा चिच्छक्तेरनुस्यूतत्वात्। अतः कारणापाटवादिदोषग्रस्तैः सामान्यजनैरप्युद्भावितः सद्गुणाश्रितः शब्दराशिर्न कदाचिदपि स्वीयं महिमानं जहाति । तेन यथासामर्थ्यं शास्त्रव्याख्यातृगुणेषु भवितव्यमेव।